# चतुर्थः पाठः - जननी तुल्यवत्सला

## प्रश्न 1: एकपदेन उत्तरं लिखत -

**(क) वृषभः दीनः इति जानन्नपि कः तं नुद्यमानः आसीत्?**

उत्तर: कृषकः

**(ख) वृषभः कुत्र पपात?**

उत्तर: भूमौ / क्षेत्रे

**(ग) दुर्बले सुते कस्याः अधिका कृपा भवति?**

उत्तर: मातुः

**(घ) कयोः एकः शरीरेण दुर्बलः आसीत्?**

उत्तर: बलीवर्दयोः

**(ङ) चण्डवातेन मेघरवैश्च सह कः समजायत?**

उत्तर: प्रवर्षः (वर्षा)

## प्रश्न 2: अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

**(क) कृषकः किं करोति स्म?**

उत्तर: कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं करोति स्म।

**(ख) माता सुरभिः किमर्थम् अश्रूणि मुञ्चति स्म?**

उत्तर: भूमौ पतितं स्वपुत्रं (दुर्बलं वृषभं) दृष्ट्वा माता सुरभिः अश्रूणि मुञ्चति स्म।

**(ग) सुरभिः इन्द्रस्य प्रश्नस्य किम् उत्तरं ददाति?**

उत्तर: सुरभिः उत्तरं ददाति यत् "हे शक्र! अहं पुत्रस्य दैन्यं दृष्ट्वा रोदिमि। सः दीनः इति जानन्नपि कृषकः तं बहुधा पीडयति।"

**(घ) मातुः अधिका कृपा कस्मिन् भवति?**

उत्तर: मातुः अधिका कृपा दीने दुर्बले च सुते भवति।

**(ङ) इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं किं कृतवान्?**

उत्तर: इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं शीघ्रमेव चण्डवातेन मेघरवैः च सह प्रवर्षम् अकरोत्।

**(च) जननी कीदृशी भवति?**

उत्तर: जननी सर्वेषु अपत्येषु तुल्यवत्सला (समान प्रेम वाली) भवति।

## प्रश्न 3: 'क' स्तम्भे दत्तानां पदानां मेलनं 'ख' स्तम्भे दत्तैः समानार्थकपदैः कुरुत -

कृच्छ्रेण - **काठिन्येन**

चक्षुर्भ्याम् - **नेत्राभ्याम्**

जवेन - **द्रुतगत्या**

इन्द्रः - **वासवः (शक्रः)**

पुत्राः - **सुताः**

शीघ्रम् - **अचिरात्**

बलीवर्दः - **वृषभः**

## प्रश्न 4: स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत -

(क) स कृच्छ्रेण भारम् उद्वहति।

**उत्तर: स केन भारम् उद्वहति?**

(ख) सुराधिपः ताम् अपृच्छत्।

**उत्तर: कः ताम् अपृच्छत्?**

(ग) अयम् अन्येभ्यः दुर्बलः।

**उत्तर: अयम् केभ्यः दुर्बलः?**

(घ) धेनूनां माता सुरभिः आसीत्।

**उत्तर: कासां माता सुरभिः आसीत्?**

(ङ) सहस्राधिकेषु पुत्रेषु सत्स्वपि तस्याः अस्मिन् प्रीतिः आसीत्।

**उत्तर: सहस्राधिकेषु केषु सत्स्वपि तस्याः अस्मिन् प्रीतिः आसीत्?**

Schorbit

## प्रश्न 5: रेखाङ्कितेषु पदेषु सन्धिं / सन्धिविच्छेदं कुरुत -

(क) कृषकः + तम् = **कृषकस्तम्**

(ख) तथा + अपि + सः = **तथापिसः**

(ग) तयोः + एकः = **तयोरेकः**

(घ) न + उत्थितः = **नोत्थितः**

(ङ) सत्सु + अपि = **सत्स्वपि**

(च) बहुनि + अपत्यानि = **बहून्यपत्यानि**

## प्रश्न 6: अधोलिखितेषु वाक्येषु सर्वनामपदं कस्मै प्रयुक्तम्?

(क) "सा च अवदत्" - अत्र 'सा' कस्मै प्रयुक्तम्?
**उत्तर: सुरभ्यै (सुरभि के लिए)**

(ख) "पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि" - अत्र 'अहम्' कस्मै प्रयुक्तम्?
**उत्तर: सुरभ्यै**

(ग) "सः दीनः इति जानन्नपि कृषकः तं पीडयति" - अत्र 'सः' कस्मै प्रयुक्तम्?
**उत्तर: वृषभाय (बैल के लिए)**

(घ) "मे बहुन्यपत्यानि सन्ति" - अत्र 'मे' कस्मै प्रयुक्तम्?
**उत्तर: सुरभ्यै**

Schorbit